





# दीपकम्

## षष्ठकक्षायाः संस्कृत-पाठ्यपुस्तकम्

© NCERT
not to be republished





राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

Reprint 2025-26

**0672 – दीपकम् – कक्षा 6**
षष्ठकक्षायाः संस्कृत-पाठ्यपुस्तकम्

**ISBN 978-93-5292-923-8**

**प्रथम संस्करण**
*जून 2024 ज्येष्ठ 1946*

**पुनर्मुद्रण**
*अप्रैल 2025 वैशाख 1947*

**PD 800T BS**

© ***राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, 2024***

**₹ 65.00**

*एन.सी.ई.आर.टी. वॉटरमार्क 80 जी.एस.एम. पेपर पर मुद्रित।*

सचिव, राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, श्री अरविंद मार्ग, नई दिल्ली 110 016 द्वारा प्रकाशन प्रभाग में प्रकाशित तथा सालासर इमेजिंग सिस्टम, ए-97, सेक्टर-58, नोएडा (उ.प्र.) 201301 द्वारा मुद्रित।

**सर्वाधिकार सुरक्षित**

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भी भाग को छापना तथा इलैक्ट्रॉनिकी, मशीनी, फ़ोटो प्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुनः प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रचारण वर्जित है।
- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशन की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार से व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।

**रा.शै.अ.प्र.प. के प्रकाशन प्रभाग के कार्यालय**

एन.सी.ई.आर.टी. कैंपस
श्री अरविंद मार्ग
**नई दिल्ली 110 016** फोन : 011-26562708

108, 100 फीट रोड
हेली एक्सटेंशन, होस्डेकेरे
बनाशंकरी III इस्टेज
**बेंगलुरू 560 085** फोन : 080-26725740

नवजीवन ट्रस्ट भवन
डाकघर नवजीवन
**अहमदाबाद 380 014** फोन : 079-27541446

सी.डब्ल्यू.सी. कैंपस
निकट : धनकल बस स्टॉप पनिहटी
**कोलकाता 700 114** फोन : 033-25530454

सी.डब्ल्यू.सी. कॉम्प्लेक्स
मालीगाँव
**गुवाहाटी 781 021** फोन : 0361-2676869

**प्रकाशन सहयोग**

| | | |
|---|---|---|
| अध्यक्ष, प्रकाशन प्रभाग | : | *एम.वी. श्रीनिवासन* |
| मुख्य संपादक | : | *बिज्ञान सुतार* |
| मुख्य उत्पादन अधिकारी (प्रभारी) | : | *जहान लाल* |
| मुख्य व्यापार प्रबंधक | : | *अमिताभ कुमार* |
| सहायक उत्पादन अधिकारी | : | *सायुराज ए.आर.* |

**आवरण एवं चित्रांकन**
*ग्रीन ट्री डिजाइनिंग स्टूडियो प्रा. लि.*

© NCERT not to be republished

# पुरोवाक्

*राष्ट्रिय-शिक्षा-नीतिः 2020* एकस्याः परिवर्तमानायाः पाठ्यचर्यायाः शैक्षिकसंरचनायाश्च अनुशंसां करोति, यस्याः प्रकल्पनं सावधानेन विभिन्नेषु स्तरेषु छात्राणां सर्वाङ्गीणविकासाय कृतमस्ति। अस्यां संरचनायाम् आधारभूते स्तरे वर्षपञ्चकम्, प्राथमिके स्तरे वर्षत्रयम्, मध्ये स्तरे वर्षत्रयं तथा च माध्यमिके स्तरे वर्षचतुष्टयं संयोजितमस्ति। सर्वेषु स्तरेषु वयोऽनुगुणः पाठ्यक्रमः, शिक्षाशास्त्रानुगुणा शिक्षा च निर्बाधगत्या सातत्येन भवेदिति प्रकल्पितमस्ति।

*राष्ट्रिय-शिक्षा-नीतिः 2020* देशे शिक्षायाः एकाम् एतादृशीं प्रणालीं परिकल्पयति या भारतीये लोकाचारे मानवीये प्रयासे एवञ्च ज्ञानस्य सर्वेषु क्षेत्रेषु भारतवर्षस्य सभ्यतागतोपलब्धौ आधारिता अस्ति, तथा च एकविंशतिशताब्द्याः सम्भावनाभिः आह्वानैश्च रचनात्मकरूपेण संयोजनाय छात्रान् सन्नद्धान् करोति। एतस्याः आह्वानात्मिकायाः दृष्टेः आधारः विद्यालयस्य सर्वेषु क्षेत्रेषु पाठ्यक्रमेषु च विद्यालयीय-शिक्षा–*राष्ट्रिय-पाठ्यचर्या-रूपरेखा 2023* इत्यनया सम्यक्तया निरूपितः अस्ति। आधारभूते स्तरे प्रारम्भिकस्तरे च मानवास्तित्वस्य सर्वेषु स्तरेषु एवञ्च पञ्चकोशेषु अन्तर्निहितानां शक्तीनां पोषणानन्तरं प्राथमिकस्तरे विद्यार्थिनः अधिगमस्य प्रगतेः मार्गं प्रशस्यति।

विद्यालयीय-शिक्षायाः *राष्ट्रिय-पाठ्यचर्या-रूपरेखा 2023* मूलभूतेन स्तरेण सह अन्येषां स्तराणां सम्बन्धं सुदृढं कर्तुं विस्तृतं मार्गनिर्देशनं प्रददाति, येन बालाः एकस्मात् स्तरात् अपरस्मिन् स्तरे सम्यक्तया स्वाधिगमस्य संवर्धनं कुर्युः। प्राथमिकस्तरे अस्याः संरचनायाः उद्देश्यम् अस्ति यत् छात्राः तैः कौशलैः परिपूर्णाः स्युः, येषां संवर्धनं तेषां तत्तत्स्तरे सर्वाङ्गीणविकासाय अपेक्षितम् अस्ति। यथा-यथा ते स्वजीवने अग्रेसरन्ति तथा-तथा तेषां विश्लेषणात्मक-वर्णनात्मक-कथनात्मकानां च क्षमतानां संवर्धनं भवति, तथा च तैः समुन्नतैः कौशलैः छात्राः भविष्ये आगम्यमानानाम् आह्वानानाम् अवसराणां च कृते सन्नद्धाः भविष्यन्ति। दशविषयैः समन्विता पाठ्यचर्या तेषां सर्वाङ्गीणविकासं सुनिश्चितं करोति। अस्यां पाठ्यचर्यायाम् अन्तर्भूतेषु विविधेषु पाठ्यक्रमेषु तिस्रः भाषाः – हिन्दी, आङ्ग्लम् उर्दू वा, संस्कृतं च इत्येतैः सह विज्ञानं गणितं सामाजिकविज्ञानं कलाशिक्षा शारीरिकशिक्षा कौशलशिक्षाश्च सम्मिलिताः सन्ति।

© NCERT not to be republished

*एन.सी.एफ्.–एस्.ई. 2023* भाषाशिक्षायै क्षमताधारिताधिगमस्य संस्तुतिं करोति, यत् प्रत्येकं शैक्षिकस्तरे दक्षतानां निदर्शनात्मकानाम् अधिगमानां च प्रतिफलेन सह पाठ्यचर्यायां निर्दिष्टस्य लक्ष्यस्य प्राप्त्यर्थम् आधारं संस्थापयति। अस्यां संरचनायाम् आधारितानि पाठ्यपुस्तकानि स्वाधिगमस्य विकसनाय अनुभवात्मके एवञ्च क्रियात्मके अधिगमे बलं ददाति। एषा स्वीकरोति यत् शिक्षकः केवलं ज्ञानवाहको न भूत्वा सौविध्य-प्रदायकस्य भूमिकां निर्वहति।

एवंविधपरिवर्तमानायै शिक्षणसंस्कृत्यै आवश्यकपरिवेशः अपेक्षितः भवति। एतादृश-परिवेशस्य कृते समुचितं पाठ्यपुस्तकम् अपेक्षितमस्ति। तत् पाठ्यपुस्तकं पाठ्यचर्यायाः विभिन्नैः क्षेत्रैः सह सम्बद्धं स्यात्, यतो हि तत् पुस्तकं शिक्षणसामग्री-शिक्षणप्रविध्योर्मध्ये एकां केन्द्रीयां भूमिकां निर्वक्ष्यति। एतत् पाठ्यपुस्तकम् अन्वेषणजिज्ञासाभ्यां प्रत्यक्षनिर्देशस्य अवसरस्य च मध्ये न्यायोचितं सन्तोलनं स्थापयेत्। समुचितं कक्षाकक्षसंयोजनं, विषयान्तरेषु च सम्प्रत्ययानां सम्बन्धस्थापनाय शिक्षकस्य सिद्धता चापि परिवर्तमानायै शिक्षणसंस्कृत्यै आवश्यकौ प्रतिबन्धौ स्तः।

“राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् स्वपक्षतः सर्वेभ्यः छात्रेभ्यः एतादृशानि पाठ्यपुस्तकानि समुपलब्धानि कर्तुं प्रतिबद्धास्ति। प्रख्यातान् विषय-विशेषज्ञान्, शिक्षाशास्त्रिणः, कार्यरतान् शिक्षकान् च सदस्यरूपेण संयोज्य एतत्प्रयोजनाय संघटितः विभिन्नपाठ्यचर्यायाः क्षेत्रसमूहः एतादृशस्य पाठ्यपुस्तकस्य विकासाय सर्वविधं यत्नं कृतवान्। संस्कृतस्य अध्ययनार्थं *‘दीपकम् –प्रथमः भागः’* इति पाठ्यपुस्तकं षष्ठकक्षायाः कृते एषु पाठ्यपुस्तकेषु अन्यतमम् अस्ति। छात्राः अनुभवात्मिकायां शिक्षायाम् अग्रेसराः भवेयुः इति एतदर्थं *राष्ट्रिय-शिक्षा-नीतिः 2020* एवञ्च *एन.सी.एफ्.–एस्.ई. 2023* इत्युभयोः प्रदत्तयोः निर्देशयोः अनुगुणं सुचिन्तनपूर्वकं सावधानेन अस्य पाठ्यपुस्तकस्य प्रकल्पनं कृतम्। अस्य सामग्रीषु वर्णमाला-संवाद-कथा-श्लोक-गीत-प्रहेलिका-दैनन्दिनव्यवहारोपयोगिनां च पाठानां संयोजनमस्ति, छात्राणां सामाजिक-सांस्कृतिक-सांवेगिक-शैक्षिक-भौगोलिकान् च प्रतिबिम्बान् सुष्ठु धारयति। एषु च तेषां स्वजीवनस्य सजीवानाम् अनुभवानां सङ्केताः नूनम् उपलब्धाः भवन्ति। *‘दीपकम्’–षष्ठकक्षायाः संस्कृत-पाठ्यपुस्तके* भारतीय-ज्ञान-परम्परायाः (आई.के.एस्.) बृहत्कोशैः कलात्मकैः सांस्कृतिकैः सम्पद्भिः च खण्डेषु सामग्रीणां ग्रथनं कृतमस्ति। तथा च पारिस्थितिक·संवेदनशीलता-लैङ्गिक·समानताभ्यां साकं समावेशि-मानवीय-मूल्यानि च अस्मिन् सन्निहितानि सन्ति। एतत् पाठ्यपुस्तकं पाठानुगुणं वर्णरञ्जितैः चित्रैः सह सूक्ष्मेण उत्कृष्टेन च शैक्षिकप्रौद्योगिक्याः सदुपयोगेन पूरितमस्ति।



Reprint 2025-26

मम मते सर्वेषां व्यावहारिकाणाम् उद्देश्यानां कृते एतत् पाठयपुस्तकं पाठ्यचर्यया सम्बद्धं सर्वं लक्ष्यं प्राप्तुं सफलम् अस्ति। अनेन चतुर्णां कौशलानां विकासेन सह प्राकृतिक्याः जिज्ञासायाः संवर्धनम् एकीकृत्य सार्थकसन्दर्भेषु 'वयं शब्दार्थान् जानीमः' अभ्यासकार्यं, योग्यताविस्तरः, परियोजनादीनां च संयोजनं कृत्वा श्रवण-भाषण-पठन-लेखनेषु चतुर्षु कौशलेषु प्रमुखदक्षतानां विकासस्य कृते मार्गदर्शनं कृतमस्ति। अस्य पाठ्यपुस्तकस्य शैक्षिकं परिप्रेक्ष्यं छात्रेषु आलोचनात्मक-चिन्तनस्य तथा च निर्णयस्य क्षमतायाः विकासस्य महत्त्वं प्रतिपादयति। अनेन सह कक्षायाः वातावरणं सजीवं कर्तुं सहाध्यायि-समूहस्य अधिगमाय पर्याप्तः अवसरः आवश्यकः। येन शिक्षकः अधीयमानः छात्रः च उभौ लाभान्वितौ भवतः।

एतद् अतिरिच्य इदम् अवधेयं यत् अनेन पाठ्यपुस्तकेन सह अन्येषाम् अपि विभिन्नानाम् अधिगमस्रोतसाम् अन्वेषणं कर्तुं छात्राः अस्मिन् स्तरे प्रोत्साहनीयाः। तादृशानां योग्यसंसाधनानां सम्प्रदाने विद्यालयस्य पुस्तकालयस्य च भूमिका महत्त्वपूर्णा भवति। एवञ्च एतत् कर्तुं मातापितृभ्यां सह शिक्षकाणां मार्गदर्शनं प्रोत्साहनं च छात्राणां कृते अमूल्यं पाथेयं भविष्यति। वस्तुतस्तु शिक्षणस्य एकं प्रभावपूर्णं वातावरणं तद् भवति, यस्मिन् छात्राः स्वयमेव प्रेरिताः भूत्वा शिक्षणे रुचिं प्रकटयन्ति तथा च अधिगमस्य प्रक्रियायां स्वरचनात्मकं योगदानं सुनिश्चितं कुर्वन्ति।

अनेन सह तान् सर्वान् प्रति कार्तज्ञ्यं बिभर्मि, ये अस्य पाठ्यपुस्तकस्य विकासे सहयोगं प्रदत्तवन्तः। आशासे यत् सर्वेषां सम्बद्धजनानां छात्राणाम् आकाङ्क्षायाः अपेक्षायाश्च पूर्तिः अनेन सुचारु भविष्यति। तथापि पाठ्यपुस्तके परिष्काराय गुणसंवर्धनाय च उपयोग-कर्तॄणां प्रस्तावाः प्रतिक्रियाः च सर्वतोभावेन अस्मत्कृते स्वागतयोग्याः सन्ति।

दिनेशप्रसादः सकलानी
*निदेशकः*
राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्

नवदेहली
*11 जून 2024*

© NCERT not to be republished



Reprint 2025-26

© NCERT
not to be republished

# भूमिका

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**

*मनुस्मृतिः २.२०*

संस्कृतभाषा आप्राचीनकालात् भारतीयकलायाः, संस्कृत्याः, सभ्यतायाः, दर्शनस्य, विज्ञानस्य, गणितस्य, इतिहासस्य, तन्त्रज्ञानादीनां विषयाणाम् अभिव्यक्तेः माध्यमरूपा वर्तते। अत एव भारतस्य संविधाने अष्टमसूच्यां वर्णिता आधुनिकीयं भाषा। अस्याः साहित्यं विशालतमम् अस्ति। उच्यते यत् ग्रीक्-लैटिन्-साहित्यद्वयमपि मेलयित्वा तुलना क्रियते चेदपि तत् संस्कृतभाषासाहित्य-समानं भवितुं नार्हति। अत एव भारतस्य संविधाने संस्कृतभाषायाः स्थानं विशेषतः कल्पितम् अस्ति।

*राष्ट्रिय-शिक्षा-नीतिः 2020* तथा च *राष्ट्रिय-पाठ्यचर्या-रूपरेखा 2023* इत्यनयोः अनुगुणम् एतत् पुस्तकं निर्मितम् अस्ति। पाठ्यपुस्तकं न केवलम् एकम् उपकरणम् अथवा माध्यमम्, अपितु तत्तद्-भाषायां निहितस्य ज्ञानराशेः बहिः प्रकाशनस्य सामग्री अस्ति। प्रायः षष्ठकक्षायां प्रथमवारं छात्राः संस्कृतं पठन्ति इत्यतः बालानां सुखबोधाय सर्वेऽपि पाठाः सचित्रं सरल-मानक-संस्कृतेन च लिखिताः। औपचारिकरूपेण चतुर्णामपि भाषाकौशलानां विकासाय पाठेषु अभ्यासेषु च विशेषतः अवधानं कृतम् अस्ति। सर्वेषु पाठेषु भाषिकतत्त्वानि समायोजितानि सन्ति। एतत् पाठ्यपुस्तकम् औपचारिक-व्याकरणभूयिष्ठं नास्ति चेदपि छात्रः भाषामाध्यमेन व्याकरण-विषयान् अवगन्तुं प्रभवेत्। ज्ञातात् अज्ञातं प्रति, सरलात् कठिनं प्रति, स्थूलात् सूक्ष्मं प्रति इत्यादीनां शिक्षणसूत्राणां तथैव प्रेरणासिद्धान्तः, क्रियासिद्धान्तः, रुचिसिद्धान्तः, रचनात्मकसिद्धान्तः इत्यादीनां शिक्षणसिद्धान्तानां च अधिष्ठाने अस्य पाठ्यपुस्तकस्य रचना कृता अस्ति। संवादाः, श्लोकाः, कथाः, गीतानि, सुभाषितानि, प्रहेलिकाः, गद्यांशाः चेति एवं-प्रकारेण पाठ्यपुस्तके विविधता प्रदर्शिता, येन कक्षायाम् अध्येतॄणाम् अध्यापकानां च मध्ये अन्तःक्रिया सातत्येन सम्भवेत्।

पाठातिरिक्ताः अपि अवगन्तव्याः विषयाः योग्यताविस्तरे योजिताः सन्ति। प्रतिपाठं विविधप्रकारकाः परियोजनाः योजिताः येन छात्राः गृहजनैः मित्रैः सामाजिक-परिवेशेन सह अन्येषां साहाय्येन च भाषाधिगमे रुचिं प्राप्स्यन्ति। भारतीय-ज्ञान-परम्परायाः (आई.के.एस्) विषये अपि पाठेषु प्रभूतसामग्र्यः सङ्कलिताः सन्ति। सामाजिक-सांस्कृतिक-नैतिक-मूल्यपरकाः

© NCERT not to be republished

पाठाः अपि अस्मिन् पाठ्यपुस्तके निहिताः सन्ति। पाठानाम् अन्ते वैविध्यपूर्णाः अभ्यासाः संयोजिताः सन्ति।

**पाठ्यपुस्तकस्य कतिचन प्रमुखाणि उद्देश्यानि –**

- षष्ठकक्षायाः छात्राः सरलसंस्कृतेन सम्प्रेषणकौशलं प्राप्नुयुः।
- परिवेशीयैः शब्दैः सह परिचिताः भवेयुः।
- पुस्तकस्थान् अधिकांशान् विषयान् स्वयमेव पठित्वा अवगच्छेयुः।
- छात्राः निरन्तरम् अधिगमं कुर्युः।
- सचित्रात् पुस्तकात् स्वाध्यायप्रवृत्तेः विकासं प्राप्नुयुः।
- स्वयं कृत्वा भाषाधिगमं लभेरन्।
- सरलसंस्कृतेन नित्योपयोगिनां पदानां वाक्यानां च प्रयोगे कुशलाः भवेयुः।
- विविधैः क्रियाकलापैः रचनाभिः च छात्राः विषयान् अवगच्छेयुः।

'अभ्यासशालिनी सा विद्या' इति उक्त्यनुसारं शिक्षण-अधिगम-अर्जन-प्रक्रियायाम् अभ्यासस्य विशिष्टं महत्त्वं प्रसिद्धमेव। भाषाशिक्षण-अधिगम-अर्जन-प्रसङ्गे तु अभ्यासानाम् अतिविशिष्टं स्थानम् इति विचार्य अस्मिन् पुस्तके अभ्यासान् प्रति विशिष्टम् अवधानं प्रदत्तम्। वस्तुतः **इदं पुस्तकं केवलं पाठ्यपुस्तकम् एव न अपितु अभ्यासपुस्तकम् अपि अस्ति।**

एवं बहुविधानि उद्देश्यानि साधयित्वा विद्यालयस्तरीयम् इदं प्रथमं संस्कृत-पाठ्यपुस्तकं छात्रान् शिक्षकान् अन्यान् च पाठकान् प्रमुदितान् करिष्यति इति कामयामहे। अत्र इदम् अवधार्यं यत् पाठ्यक्रमः पाठ्यपुस्तकं च शिक्षणस्य निरन्तरं विकसनशीला प्रक्रिया। अतः यद्यपि पाठ्यपुस्तकं छात्राणां संस्कृतभाषाधिगमे उत्कृष्टं स्यात् इति अस्माभिः प्रयत्नः कृतः, तथापि अध्येतॄणां बुधजनानां च कालानुकालं पाठ्यपुस्तकम् अधिकम् उपयोगि कर्तुं प्रदत्तानां प्रस्तावानां वयं स्वागतं कुर्मः।

© NCERT not to be republished



Reprint 2025-26

# राष्ट्रिय-पाठ्यक्रम-शिक्षणाधिगम-सामग्री-समितिः (एन्.एस्.टी.सी.)

महेशचन्द्रः पन्तः, *कुलाधिपतिः*, राष्ट्रिय-शैक्षिक-योजना-प्रशासन-संस्थानम् — **अध्यक्षः**

मञ्जुलः भार्गवः, *आचार्यः*, प्रिन्सटन-यूनिवर्सिटी, यू.एस्.ए. — **सह-अध्यक्षः**

सुधा मूर्तिः, *प्रतिष्ठिता लेखिका शिक्षाविद् च*

बिबेकः देबरॉयः, *अध्यक्षः*, प्रधानमन्त्रिणः आर्थिक-परामर्श-परिषद् (ई.ए.सी.- पी.एम्.)

शेखरः माण्डे, *पूर्व-महानिदेशकः*, सी.एस्.आई.आर्. तथा *आचार्यः*, सावित्रीबाई-फुले-पुणे-विश्वविद्यालयः, पुणे

सुजाता रामदोरई, *आचार्या*, ब्रिटिश्-कोलम्बिया-विश्वविद्यालयः, कनाडा

शङ्करः महादेवन्, *संगीत-विशेषज्ञः*, मुम्बई

यू. विमलकुमारः, *निदेशकः*, प्रकाश-पादुकोण-बैडमिण्टन्-अकादमी, बेङ्गळूरुः

मिशेल् दनिनो, *अतिथि-आचार्यः*, आई.आई.टी., गान्धीनगरम्

सुरीना राजन्, *आई.ए.एस.*, हरियाणा (सेवानिवृत्ता) तथा *पूर्व-महानिदेशिका*, एच्.आई.पी.ए.

चमूकृष्णः शास्त्री, *अध्यक्षः*, भारतीय-भाषा-समितिः, शिक्षा-मन्त्रालयः, भारत-सर्वकारः

संजीवः सान्यालः, *सदस्यः*, प्रधानमन्त्रिणः आर्थिक-परामर्श-परिषद् (ई.ए.सी.- पी.एम्.)

एम्.डी. श्रीनिवासः, *अध्यक्षः*, सेण्टर्-फॉर्-पॉलिसी-स्टडीज़्, चेन्नई

गजाननः लोण्ढे, *अध्यक्षः*, योजना-कार्यालयः (प्रोग्राम्-ऑफिस्), एन्.एस्.टी.सी.

रेबिनः छेत्री, *निदेशकः*, एस्.सी.ई.आर्.टी., सिक्किमः

प्रत्यूषकुमारः मण्डलः, *आचार्यः*, सामाजिकविज्ञान-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

दिनेशकुमारः, *आचार्यः*, योजना-अनुवीक्षण-प्रभागः, रा.शै.अ.प्र.प., नव-देहली

कीर्तिः कपूरः, *आचार्या*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

रञ्जना अरोड़ा, *आचार्या अध्यक्षा च*, पाठ्यचर्या-अध्ययन-विकास-विभागः, रा.शै.अ.प्र.प., नव-देहली — **सदस्य-सचिवा**

© NCERT not to be republished

# भारतस्य संविधानम्

## प्रस्तावना

**वयं, भारतस्य जनाः,**
**भारतं**
[**सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादि, सम्प्रदायनिरपेक्षं,**
**लोकतन्त्रात्मकं गणराज्यं विधातुं**][१]
तस्य समस्तान् नागरिकांश्च

सामाजिकम्, आर्थिकं, राजनीतिकं च – **न्यायं**,
विचारस्य, अभिव्यक्तेः,
आस्थायाः, धर्मस्य, उपासनायाश्च – **स्वतन्त्रतां**,
प्रतिष्ठायाः, अवसरस्य च – **समतां**
प्रापयितुं,
तेषु सर्वेषु च व्यक्तिगौरवस्य
[राष्ट्रस्य एकतायाः, अखण्डतायाश्च][२] सुनिश्चायिकां – **बन्धुतां**
वर्धयितुं;

कृतदृढसङ्कल्पाः
**अस्याम् अस्मदीयायां संविधानसभायाम्**
अद्य, ख्रिस्तीये १९४९-तमे वर्षे नवम्बर-मासस्य २६-तमे दिने
(२००६-तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ)
**एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्,**
**आत्मार्पितं च कुर्महे।**

---

१ संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २-अनुभागेन "सम्पूर्णप्रभुत्वसम्पन्नं लोकतन्त्रात्मकं गणराज्यम्" इति एतेभ्यः शब्देभ्यः प्रति एते शब्दाः संनिवेशिताः।

२ उपर्युक्तस्य अधिनियमस्य उक्तेन अनुभागेन "राष्ट्रस्य एकतायाः" इति एताभ्यां शब्दाभ्यां प्रति एते शब्दाः संनिवेशिताः।

# पाठ्यपुस्तक-निर्माण-समितिः

**अध्यक्षः, संस्कृत-भाषा-उप-समूहः**

चान्दकिरणः सलूजा, *न्यासी निदेशकः च*, संस्कृत-संवर्धन-प्रतिष्ठानम्, नव-देहली

**संस्कृत-भाषा-उप-समूहः**

कुमारः बागेवाडिमठः, *सहायक-आचार्यः*, शिक्षा-विभागः, राष्ट्रिय-संस्कृत-विश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः

डम्बरुधरः पतिः, *सहायक-आचार्यः*, शिक्षा-विभागः, जयपुर-परिसरः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, जयपुरं राजस्थानम्

दिवाकरः शर्मा, *टी.जी.टी. संस्कृतं*, पी.एम.श्री. केन्द्रीयविद्यालयः क्र.-2, ए.एफ्.एस्., ग्वालियरम्, मध्यप्रदेशः

निधिः वेदरत्नः, *टी.जी.टी. संस्कृतं*, कोर्-अकादमिक्-इकाई, परीक्षा-शाखा, शिक्षा-निदेशालयः, देहली-सर्वकारः

भागीरथिनन्दः, *आचार्यः*, श्री-लालबहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयः, नव-देहली

मनोरमा, *सहायक-आचार्या*, संस्कृत-विभागः, ज़ाकिर-हुसैन-दिल्ली-कॉलेज्, नव-देहली

मुकेशकुमारः, *सहायक-आचार्यः*, सनातन-धर्म-आदर्श-संस्कृत-महाविद्यालयः, डोहगी, ऊना, हिमाचलप्रदेशः

रणजितः बेहेरा, *आचार्यः*, संस्कृत-विभागः, देहली-विश्वविद्यालयः, नव-देहली

वन्दना जे., *शैक्षणिक-निदेशिका*, शारदा-गुरुकुलम्, चेम्मण्डा, त्रिशूरः, केरला

वाई.एस्. रमेशः, *आचार्यः*, शिक्षा-विभागः, जयपुर-परिसरः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, जयपुरं, राजस्थानम्

विजयपालः शास्त्री, *आचार्यः*, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीरघुनाथ-कीर्ति-परिसरः, देवप्रयागः, उत्तराखण्डः

वेङ्कटसुब्रह्मण्यः पी., *निदेशकः*, व्योम-लिङ्ग्विस्टिक्-ल्याब्स्-फाउन्डेशन, बेङ्गळूरुः, कर्नाटकः

संभाजिः विट्ठलः पाटीलः, *सहायक-आचार्यः*, वसन्तराव-नाईक-शासकीय-कला-समाजविज्ञान-संस्था, नागपुरं, महाराष्ट्रम्

© NCERT not to be republished

सिद्धार्थः ए. भार्गवः, *मुख्य-परामर्शकः* योजना-कार्यालय-सदस्यः – संस्कृतं भारतीय-ज्ञान-परम्परा च (आई.के.एस्.) सी.ए.जी., एन्.एस्.टी.सी. – पी.ओ. तथा टी.एस्.जी. – एन्.सी.एफ़्.।
*निदेशकः*, ओं शान्तिधाम – वेद-गुरुकुलम्, बेङ्गळूरुः, कर्नाटकः

सुदेष्णा भट्टाचार्या, *आचार्या*, संस्कृत-विभागः, गुवाहाटी-विश्वविद्यालयः, गुवाहाटी, असमः

सुशान्तकुमारः रायः, *सहायक-आचार्यः*, शिक्षाशास्त्र-विभागः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीसदाशिव-परिसरः, पुरी, ओडिशा

सूर्यमणिः भण्डारी, *सहायक-आचार्यः*, व्याकरण-विभागः, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीरघुनाथ-कीर्ति-परिसरः, देवप्रयागः, उत्तराखण्डः

**सदस्य-समन्वयकः**

जतीन्द्रः मोहनः मिश्रः, *आचार्यः*, भाषा-शिक्षा-विभागः तथा संयोजकः, पाठ्यचर्या-क्षेत्र-समूह, संस्कृतं, रा.शै.अ.प्र.प., नव-देहली

**सदस्य सह-समन्वयक**

देवकीनन्दनः, *सहायक-आचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

वाचस्पतिनाथः झा 'मणिः', *सहायक-आचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नव-देहली

© NCERT not to be republished



Reprint 2025-26

# कार्तज्ञ्यम्

पाठ्यपुस्तकस्यास्य निर्माणप्रक्रियायां मार्गदर्शने समीक्षायां च बहुमूल्ययोगदानार्थं राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् *राष्ट्रिय-पाठ्यचर्या-रूपरेखा*–पर्यवेक्षणसमितेः सदस्यैः सह अध्यक्षेभ्यः संस्कृतभाषायाः पाठ्यचर्या-क्षेत्रसमूहस्य सर्वसदस्येभ्यः अन्येभ्यः अन्तःसम्बन्धिविषयाणां पाठ्यचर्याक्षेत्रसमूहानाम् अध्यक्षेभ्यः सदस्येभ्यश्च कार्तज्ञ्यं प्रकटयति।

प्रो. मीरा-भार्गव-महाशयाः पुस्तकस्य कात्स्न्र्येन पुनरीक्षणं कृत्वा प्रतिपुष्टिप्रदानेन अस्मान् अनुगृहीतवत्यः। तदर्थं ताभ्यः भूरिशः धन्यवादान् ज्ञापयामः।

पुस्तकस्य निर्माणे येषां कवीनां रचनाकाराणां च कृतयः सङ्कलिताः सन्ति तेभ्यः विद्वद्भ्यः परिषदियं हार्दं कार्तज्ञ्यं निवेदयति। अस्मिन् पुस्तके संस्कृत-संवर्धन-प्रतिष्ठानं, नवदेहली (www.samskritpromotion.in), तथा च Patrick J. Lynch, medical illustrator; C. Carl Jaffe, MD, cardiologist (www.patricklynch.net) इत्यनयोः कासाञ्चन सामग्रीणां संग्रहः कृतः। तदर्थम् उभयोः कृते कार्तज्ञ्यं निवेद्यते।

*वरिष्ठशोध-सहायकः* श्रीबालमुकुन्दः एवञ्च *कनिष्ठपरियोजनाध्येतारः* डॉ. देवेशः शर्मा, डॉ. अङ्कितसिंहः यादवः, निमेशकुमारः सिंहः, सरस्वती मिश्रा, विशालः त्यागी, डॉ. गोविन्ददासः तथा च फरहीन फातिमा *(संविदा–डी.टी.पी. संचालिका)* प्रक्रियायां यथायोग्यं सहयोगं दत्तवन्तः, अतः ते साधुवादार्हाः सन्ति।

अस्य पुस्तकस्य अन्तिमं रूपं प्रदातुं प्रकाशन-प्रभागं प्रति कृतज्ञतां ज्ञापयामः। पाठ्यपुस्तकस्य संपादने *सहायकसंपादिकां (संविदा)* अनुपमा-भारद्वाजं प्रति तथा च प्रकाशन-विभागे *डी.टी.पी. प्रकोष्ठस्य प्रभारिणं* पवनकुमार-बरियारं प्रति धन्यवादं प्रकटयामः। रा.शै.अ.प्र.प. इत्यस्य प्रकाशन-प्रभागे *संविदारूपेण कार्यरतान् डी.टी.पी.-संचालकान्* विपनकुमार-शर्माणं, राजश्री-सैनीं, विवेक-राजपूतं च प्रति धन्यवादान् समर्पयामः।

# राष्ट्र-गीतम्

***वन्दे मातरं, वन्दे मातरम्।***
***सुजलां सुफलां मलयज-शीतलाम्***
***शस्य-श्यामलां मातरम्,***
***वन्दे मातरम्॥***

***शुभ्र-ज्योत्स्ना-पुलकित-यामिनीम्***
***फुल्ल-कुसुमित-द्रुमदल-शोभिनीम्***
***सुहासिनीं सुमधुर-भाषिणीम्***
***सुखदां वरदां मातरम्,***
***वन्दे मातरं, वन्दे मातरम्॥***

सत्यमेव जयते

'वन्दे मातरम्' इति गीतं बङ्किमचन्द्र·चट्टोपाध्याय·महोदयेन रचितस्य काव्यस्य आदिमः अंशः अस्ति, यत् संस्कृत-भाषायां गुम्फितम् अस्ति। इदं गीतं स्वातन्त्र्य-संग्रामे भारतवासिनां नितरां प्रेरणाप्रदम् आसीत्। २४.०१.१९५० इति दिनाङ्के भारतस्य राष्ट्रपतिः डा. राजेन्द्र·प्रसादः संविधान-सभायाम् एवम् उद्घोषितवान् – " 'वन्दे मातरम्' यत् भारतस्य स्वातन्त्र्यान्दोलनस्य उद्दीपने एकाम् ऐतिहासिकीं भूमिकां निरूढवत्, तत् राष्ट्र-गानेन 'जन-गण-मन' इत्यनेन सह समानरूपेण सम्मानितं भविष्यति, समानं च महत्त्वं धारयिष्यति।"

© NCERT not to be republished





# पाठानुक्रमणिका


| | | | |
|---|---|---|---|
| *पुरोवाक्* | | | *iii* |
| *भूमिका* | | | *vii* |
| *वर्णमाला* | | | *xvi* |
| १. | प्रथमः पाठः | **वयं वर्णमालां पठामः** | 1 |
| २. | द्वितीयः पाठः | **संयुक्त-व्यञ्जनानि** | 25 |
| ३. | तृतीयः पाठः | **एषः कः ? एषा का ? एतत् किम् ?** | 31 |
| ४. | चतुर्थः पाठः | **अहं च त्वं च** | 47 |
| ५. | पञ्चमः पाठः | **संख्यागणना ननु सरला** | 61 |
| ६. | षष्ठः पाठः | **अहं प्रातः उत्तिष्ठामि** | 70 |
| ७. | सप्तमः पाठः | **शूराः वयं धीराः वयम्** | 77 |
| ८. | अष्टमः पाठः | **सः एव महान् चित्रकारः** | 89 |
| ९. | नवमः पाठः | **अतिथिदेवो भव** | 98 |
| १०. | दशमः पाठः | **बुद्धिः सर्वार्थसाधिका** | 106 |
| ११. | एकादशः पाठः | **यः जानाति सः पण्डितः** | 112 |
| १२. | द्वादशः पाठः | **त्वम् आपणं गच्छ** | 121 |
| १३. | त्रयोदशः पाठः | **पृथिव्यां त्रीणि रत्नानि** | 130 |
| १४. | चतुर्दशः पाठः | **आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः** | 141 |
| १५. | पञ्चदशः पाठः | **माधवस्य प्रियम् अङ्गम्** | 152 |
| १६. | षोडशः पाठः | **वृक्षाः सत्पुरुषाः इव** | 160 |
| | परिशिष्टम् | आगच्छन्तु ! संस्कृतेन संभाषणं कुर्मः | 168 |


© NCERT not to be republished

Reprint 2025-26

# वर्णमाला


## वर्णाः

### (१) स्वराः

| | |
|---|---|
| समानाक्षराणि | अ आ इ ई उ ऊ ऋ ॠ ऌ |
| सन्ध्यक्षराणि | ए ऐ ओ औ |

### (२) व्यञ्जनानि

| | | |
|---|---|---|
| स्पर्शाः (वर्ग्याः) | | क ख ग घ ङ |
| | | च छ ज झ ञ |
| | | ट ठ ड ढ ण |
| | | त थ द ध न |
| | | प फ ब भ म |
| अन्तःस्थाः (अर्ध-स्वराः) | | य र ल व |
| ऊष्माणः | | श ष स ह |
| अयोगवाहौ | अनुस्वारः | अं |
| | विसर्गः | अः |



© NCERT not to be republished